एकादश्यपवासस्तु कर्त्तव्यो नात्र संशयः" ॥
कात्यायनस्मृतौ च ।
"अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः ।
एकादश्यामुपवसेत् पक्षयोरुभयोरपि" ॥ * ॥
अशक्तौ प्रतिनिधिः । वायुपुराणे ।
"उपवासे त्वशक्तस्य आहिताग्नेरथापि वा ।
पुत्त्रान् वा कारयेदन्यान् ब्राह्मणान् वापि कारयेत् ॥
अथवा विप्रमुख्येभ्यो दानं दद्यात् स्वशक्तितः ।
उपवासन्तु कुर्व्वाणः पुण्यं शतगुणं भवेत्" ॥
मार्कण्डेयपुराणे च ।
"एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।
पयोमूलफलैर्व्वापि न निर्द्वादशिको भवेत्" ॥*॥
अनुकल्पापवादः । गरुड़पुराणे ।
"मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने ।
फलमूलजलाहारी हृदि शल्यं समार्पयेत्" ॥ * ॥
एकादशीमाहात्म्यम् । तत्त्वसागरे ।
"एकादशीसमं किञ्चित् पावनं न च विद्यते ।
स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्त्रप्रदायिनी" ॥
गारुड़े च ।
"एकादशीव्रतं भक्त्या यः करोति नरः सदा । [॥*॥
स विष्णुलोकं व्रजति याति विष्णोः सरूपताम्" ।
उपवासदिननिर्णयः । सौरधर्म्मोत्तरे ।
"एकादशीमुपवसेत् द्वादशीमथवा पुनः । [॥*॥
विमिश्रां वापि कुर्व्वीत न दशम्या युतां क्वचित्"
विद्धोपवासदोषमाह वशिष्ठः ।
"दशम्येकादशी यत्र तत्र नोपवसेद्बुधः ।
अपत्यानि विनश्यन्ति स्वर्गलोकं न गच्छति" ॥*॥
द्वादश्युपवासफलम् । स्कान्दे ।
"ऊर्द्ध्वं हरिदिनं न स्यात् द्वादशीं ग्राहयेत्ततः ।
द्वादश्यामुपवासोऽत्र त्रयोदश्यान्तु पारणम् ॥
एवं कुर्व्वन् नरो भक्त्या विष्णुसायुज्यमाप्नुयात् ।
अन्यथा कुरुते यस्तु स याति नरकं ध्रुवम्" ॥*॥
सपूर्णालक्षणेन विद्धालक्षणम् । भविष्यपुराणे ।
"आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता ।
एकादशी च संपूर्णा विद्धान्या परिकीर्त्तिता" ॥*॥
अरुणोदयविद्धापरित्यागमाह कण्वः ।
"अरुणोदयवेलायां दशमीसंयुता यदि ।
अत्रोपोष्या द्वादशी स्यात् त्रयोदश्यान्तु पारणं" ॥*॥
वेधश्चतुर्विधः । ब्रह्मवैवर्त्ते ।
"अरुणोदयवेधः स्यात् सार्द्धन्तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासन्दर्शनाद्रवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते ।
तुरीयस्तत्र विहितो योगः सूर्य्योदये बुधैः" ॥*॥
अरुणोदयविद्धोपवासदोषः । पाद्मे ।
"अरुणोदयकाले तु वेधं दृष्ट्वा चतुर्व्विधम् ।
मद्दिनं ये प्रकुर्व्वन्ति यावदाहूतनारकाः" ॥*॥
शुद्धाविशेषपरित्यागः । गारुड़े ।
सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
वैष्णवी च त्रयोदश्यां घटिकैकापि दृश्यते ॥
गृहस्थोऽपि परां कुर्य्यात् पूर्व्वां नोपवसेत्तदा" ॥*॥
अथाष्टमहाद्वादशीनां विशेषतो निरूपणम् ।

"उन्मीलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥
द्वादश्योऽष्टौ महापुण्याः सर्व्वपापहरा द्विज ।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा ॥
नक्षत्रयोगाच्च बलात् पापं प्रशमयन्ति ताः" ॥ * ॥
अथोन्मीलनी । यथा ब्रह्मवैवर्त्ते ।
"एकादशी च संपूर्णा वर्द्धते पुनरेव सा ।
द्वादशी च न वर्द्धेत कथितोन्मीलनी च सा" ॥
पद्मपुराणे ॥
"सर्व्वत्रैकादशी कार्य्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम्" ॥*॥
अथ वञ्जुली । ब्रह्मवैवर्त्ते ।
"द्वादश्येव विवर्द्धेत नचैवैकादशी यदा ।
वञ्जुलीति भृगुश्रेष्ठ ! कथिता पापनाशिनी" ॥
भागवतादितन्त्रे ।
"संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम्" ॥*॥
अथ त्रिस्पृशा । ब्रह्मवैवर्त्तपुराणे ।
"अरुणोदय आद्या स्यात् द्वादशी सकलं दिनम् ।
अन्ते त्रयोदशी प्रातस्त्रिस्पृशा सा हरेः प्रिया" ॥
नारदीये ।
"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति" ॥
अथ पक्षवर्द्धिनी । ब्रह्मवैवर्त्ते ।
"दर्शश्च पौर्णमासी च संपूर्णा वर्द्धते यदि ।
द्वितीयेऽह्नि द्विजश्रेष्ठ सा भवेत् पक्षवर्द्धिनी" ॥*॥
ब्रह्मवैवर्त्ते ।
"कुहूराके यदा वृद्धिं प्रयाते पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत्" ॥ * ॥
अथ जयादिः । ब्रह्मवैवर्त्ते ।
"पुष्यश्रवणपुष्यादरोहिणीसंयुतास्तु ताः ।
उपोषिताः समंफला द्वादश्योऽष्टौ पृथक् पृथक्" ॥
अथोपवासदिनकृत्यम् । देवलः ।
"गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासन्तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः" ॥
तत्र सङ्कल्पमन्त्रः ।
"एकादश्यां निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत" ॥ * ॥
पुष्पाञ्जलित्रयदानं मन्त्रपूतजलपानञ्चाह मार्कण्डेयः ।
"अष्टाक्षरेण मन्त्रेण त्रिजप्तेनाभिमन्त्रितम् ।
उपवासफलं प्रेप्सुः पिबेत्तोयं समाहितः ॥
देवार्च्चनं ततः कृत्वा पुष्पाञ्जलिमथापि वा ।
संकल्पमन्त्रमुच्चार्य्य देवाय विनिवेदयेत्" ॥ * ॥
संकल्पादौ विशेषः । नारदीये ।
"पूर्व्वायाः सङ्गदोषेणैकादश्याः स्नानपूजने ।
वर्ज्जयन्ति नराः पूर्व्वान् यामांश्च चतुरो द्विज ॥
तदूर्द्ध्वं स्नानपूजादि कर्त्तव्यं तदुपोषितैः ।
न दिवा शुद्धिमाप्नोति तदा रात्रौ विधीयते ॥
दिनकार्य्यमशेषञ्च कर्त्तव्यं शर्व्वरीमुखे" ॥ * ॥
पूजाजागरणविधिः । ब्राह्मे ।

स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः ॥
संपूज्य विधिवद्विष्णुं श्रद्धायातिसमाहितः ।
पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ॥
उपहारैर्बहुविधैर्जपहोमप्रदक्षिणैः ।
स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोरमैः ॥
एवं संपूज्य विधिवद्रात्रौ कुर्य्यात् प्रजागरम्" ॥*॥
अथ जागरणलक्षणम् । स्कान्दे ।
"शृणु नारद वक्ष्यामि जागरस्य तु लक्षणम् ।
येन विज्ञातमात्रेण दुर्लभो न जनार्द्दनः ॥
गीतं वाद्यञ्च नृत्यञ्च पुराणपठनन्तथा ।
धूपं दीपञ्च नैवेद्यं पुष्पगन्धानुलेपनम् ॥
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रियनिग्रहः ।
सत्यान्वितं विनिद्रञ्च मुदायुक्तं क्रियान्वितम् ॥
साश्चर्य्यञ्चैव सोत्साहं पापालस्यादिवर्ज्जितम् ।
प्रदक्षिणाभिः संयुक्तं नमस्कारपुरःसरम् ॥
नीराजनसमायुक्तमनिर्व्विण्णेन चेतसा ।
यामे यामे महाभागे कुर्य्यादारात्रिकं हरेः ॥
एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं हरेः' ॥ * ॥
अथ पारणदिनकृत्यम् । कात्यायनः ।
"प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।
पारणन्तु ततः कुर्य्यात् व्रतसिद्धौ हरिं स्मरन्" ॥
तत्र समर्पणमन्त्रः ।
"अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव" ॥ * ॥
अथ पारणे द्वादशीलङ्घने दोषः । स्कान्दे ।
"पारणाहनि संप्राप्ते द्वादशीं यो व्यतिक्रमेत् ।
त्रयोदश्यान्तु भुञ्जानः शतजन्मानि नारकी" ॥ * ॥
अथ द्वादश्यल्पत्वे कृत्यसमाधानम् । देवीरहस्ये ।
"अल्पा चेद्द्वादशी कुर्य्यात् नित्यकर्म्मारुणोदये ।
अत्यल्पा चेन्निशीथोऽर्द्धमामध्याह्निकमेव तत्" ॥*॥
अथ सङ्कटे पारणसमाधानम् । कात्यायनः ।
"मन्त्रं जपित्वा हरये निवेद्योपोषणं व्रती ।
अद्भिस्तु पारणं कुर्य्यात् सङ्कटे विषमे सति" ॥ * ॥
अथ हरिवासरकालपारणनिषेधः । विष्णुधर्म्मोत्तरे ।
"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः" ॥ * ॥
अथ द्वादशीदिने वर्ज्जनीयानि । स्कान्दे ।
"क्षौद्रं मांसं सुरां तैलं व्यायामं क्रोधमैथुने ।
परान्नं कांस्यताम्बूले लोभं निर्म्माल्यलङ्घनम् ॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्" ॥
अपि च । वितथभाषणम् । प्रवासः । दिवास्वप्नः । अञ्जनम् । शिलापिष्टम् । मसूरम् । द्यूतम् । हिंसा । चणकम् । कोरदूषकम् । औषधम् । एतानि पुराणान्तरोक्तान्यपि वर्ज्जनीयानि ॥ * ॥ इति श्रीहरिभक्तिविलासोक्तैकादशीव्यवस्था समाप्ता ॥*॥
अथ पश्चिमदेशप्रसिद्धनानापुराणोक्तषड्विंशत्येकादशीनामानि लिख्यन्ते । अथाग्रहायणस्य कृष्णैकादशी उत्पन्ना १ शुक्ला मोक्षा २ । पौषस्य कृष्णैकादशी सफला ३ शुक्ला पुत्त्रदा ४ । माघस्य कृष्णाकादशी षट्तिला ५ शुक्ला जया ६ । फाल्गु-